**दिनाङ्क :- 26.07.2026**

**प्रात: - 06:55**

## प्रधानस्य त्यागपत्रम्

केन्द्रीयशिक्षामन्त्री धर्मेन्द्रप्रधानः स्वपदात् त्यागपत्रं दत्त्वा तत् प्रधानमन्त्रिणे नरेन्द्रमोदिने समर्पितवान्। सामाजिकसञ्चारपटले प्रकाशिते एकस्मिन् सन्देशे श्रीप्रधानः अवदत् यत् गतदशदिनेषु छात्राणां विरोधप्रदर्शनानन्तरं उत्पन्नया परिस्थित्या सः अत्यन्तं व्यथितः अभवत्। एतद् स्वस्य प्रतिष्ठायाः विषयः नास्तीति अपि तेन उक्तम्। असौ नवदिल्ल्यां जन्तरमन्तर-स्थले विद्यमानां स्थितिं समग्रदेशस्य परिस्थितिं च अवलोक्य निर्णयम् अकरोत्। श्रीप्रधानः प्रधानमन्त्रिणः नरेन्द्रमोदिनः मार्गदर्शनाय, विश्वासाय, निरन्तरसहयोगाय च कृतज्ञताम् अपि प्रकटितवान्। असौ एतदपि उक्तवान् यत् राष्ट्रसेवा तस्य जीवनस्य सर्वोच्च-प्राथमिकता अस्ति तथा च जीवनपर्यन्तं तस्यै समर्पितः भविष्यति इति।

## जोशी - शिक्षामन्त्री

राष्ट्रपतिपदासीना द्रौपदी मुर्मुः केन्द्रीयमन्त्रिपरिषदः धर्मेन्द्रप्रधानस्य त्यागपत्रं तत्क्षणप्रभावेण स्वीकृतवती। धर्मेन्द्रप्रधानस्य त्यागपत्रानन्तरं केन्द्रीयमन्त्री प्रह्लादजोशी नूतनशिक्षामन्त्री भविष्यति। वर्तमानदायित्वेन सह शिक्षामन्त्रालयस्य दायित्वमपि तस्मै समर्पितम्।

## राष्ट्रपतिः - आधिकारिकयात्रा

राष्ट्रपतिपदासीना द्रौपदी मुर्मुः मोल्दोवा-उत्तरमैसेडोनिया-रोमानियादेशानां आधिकारिकयात्रां सम्पन्नं कृत्वा अद्य प्रातः नवदिल्लीं प्रत्यागतवती। अस्यां यात्रायां अनेकानि ऐतिहासिकसोपानानि स्थापितानि। तेषु कस्यापि भारतीयराष्ट्रपतेः मोल्दोवा-उत्तरमैसेडोनियादेशयोः प्रथमा आधिकारिकयात्रा तथा त्रिदशकाधिकानन्तरं रोमानियादेशस्य प्रथमा आधिकारिकयात्रा सम्मिलिता अस्ति। समग्रयात्रावधौ राष्ट्रपतिपदासीना मूर्मुः विभिन्नदेशानां राष्ट्राध्यक्षैः सह प्रतिनिधिमण्डलस्तरीयवार्ताः अकरोत्, व्यापारमञ्चान् सम्बोधितवती तथा भारतीयप्रवासिसमुदायस्य सदस्यैः सह संवादम् अपि अकरोत्।

## संसद् - विधेयकम्

प्रशासनं श्वः लोकसभायां सार्वजनिकपरीक्षा-अनुचितसाधन-निवारण-संशोधन-विधेयकम्, विंशतिः षड्विंशतिः इति प्रस्तुतं करिष्यति। एतत् विधेयकं सोमवासरस्य लोकसभाकार्यसूचौ समाविष्टम् अस्ति। एतेन सार्वजनिकपरीक्षा-अनुचितसाधन-निवारण-अधिनियमः, विंशतिः चतुर्विंशतिः इत्येतस्मिन् संशोधनं भविष्यति। केन्द्रीयमन्त्री डॉ. जितेन्द्रसिंहः एतत् विधेयकं लोकसभायां प्रस्तुतं करिष्यति। उल्लेखनीयम् अस्ति यत् गतशुक्रवासरे केन्द्रीयमन्त्रिमण्डलेन प्रश्नपत्रस्य गोप्यताभङ्गे परीक्षासु च अनुचितसाधन-प्रयोगप्रकरणेषु द्रुतन्यायालयानां स्थापनाय दोषिषु च कठोरतर-दण्डविधानं सुनिश्चेतुं प्रारूपविधेयकं अनुमोदितम्।

## मन की बात

प्रधानमन्त्री नरेन्द्रमोदी अद्य पूर्वाह्ने एकादशवादने स्वीय “मन की बात” इत्येतस्मिन् कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। “मन की बात” इति मासिक-कार्यक्रमस्य इदं षड्त्रिंशदधिकैकशतं संस्करणं भविता। अस्य कार्यक्रमस्य प्रसारणं आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनिभिः प्रसारयिष्यते। अयं कार्यक्रमः आकाशवाणी, दूरदर्शनम्, प्रधानमन्त्री-कार्यालयः, सूचनाप्रसारण-मन्त्रालयः इत्येतेषां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते इति। प्रधानमन्त्रिणः सम्बोधनानन्तरं अनुक्षणं अयं कार्यक्रमः क्षेत्रीय-भाषाष्वपि श्रोतुं शक्यते।

## प्रधानमन्त्री-वाइब्रेण्ट विलेज

प्रधानमन्त्री नरेन्द्रमोदी अद्य सायं सार्ध-चतुर्वादने दृश्य-श्रव्य-परान्तर्जालीय-माध्यमेन षड्विंशत्यधिक-द्विसहस्रतमस्य विकसित वाइब्रेण्ट विलेज कार्यक्रमस्य सहभागिभिः सह संवादं साधयिष्यति । अस्य कार्यक्रमस्यान्तर्गतं प्रत्येकस्य राज्यस्य सहैव केन्द्रशासित-प्रदेशस्य प्रतिनिधित्वं कुर्वाणाः चतुश्शताधिकाः युव-सहभागिनः प्रधानमन्त्रिणा सह मन्त्रणां विधास्यन्ति। विकसित वाइब्रेण्ट विलेज कार्यक्रमस्तावत् जून-मासस्य चतुर्थ-दिनाङ्कतः त्रिंशत्-दिनाङ्कं यावत् पर्याय-द्वये आयोजितम् , यस्मिन् लद्दाख-हिमाचलप्रदेश-उत्तराखण्डानां चतुःसप्ततिः वाइब्रेण्ट इति विकासशील-ग्रामाः समाविष्टाः। अयं कार्यक्रमः तावत् सहभागिभ्यः भारतस्य सीमवर्ती-क्षेत्राणां सामाजिकार्थिक-स्थितिम्, सांस्कृतिक-न्यासं, विकास-आकाङ्क्षाः च प्रत्यक्षतः अवगन्तुम् अवसरान् प्रायच्छत्। एतदतिरिच्य, अनेन जन-सहभागिता, राष्ट्रिय-एकीकरणम् सहैव सीमवर्ती-ग्रामाणां सामरिक-महत्त्वस्य गभीरा बोधकता सुदृढीकृता।

**<u>क्रिकेटक्रीडा</u>**

विंशति-प्रतिविंशतेः पुरुष-क्रिकेट-स्पर्धायाम् भारतेन त्रिस्पर्धात्मक-शृङ्खलायाः द्वितीय-क्रीडायां जिम्बाब्वे-दलं नवति-धावनाङ्कैः पराजितम्।